M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 690

Title: Tarkāmṛtam

670

670

1341

:	Tarkāmritam	:	Title
:	: Jagadish Bhattacharya	:	Author
:	:	:	Editor
:	: Saka 1778	:	Year. Vols.
:	:	:	Publisher
670 :	:	:	Remarks

अथतर्कामृतारंभः श्रीर्जयतु

श्रीगणेशायनमः श्रीमद्गुरवेनमः ब्रह्माद्यानिखिलार्चितांघ्रिदृशसंदोहाः सदाभीष्टदाः स्वाज्ञानप्रशमाययत्रमन
सोवृत्तीः समस्तादधुः श्रीविष्णोश्चरणांबुजंभवभयध्वंसैकबीजंपरंहृत्पद्मेविनिधायतन्निरूपमंतर्कामृतंतन्यते १ अ
थश्रुतिःश्रूयते आत्मावाअरेद्रष्टव्यः श्रोतव्योमंतव्योनिदिध्यासितव्यइति अस्यार्थः मुमुक्षुणाआत्माद्रष्टव्यः मुमुक्षोरा
त्मदर्शनमिष्टसाधनमितियावत् आत्मदर्शनोपायःकइत्याह श्रोतव्यइत्यादि तेनार्थक्रमेणशब्दक्रमस्त्यक्तोभवति अ
ग्निहोत्रंजुहोतियवागूंपचतीत्यादिवत् तथाचश्रवणमनननिदिध्यासनानितत्त्वज्ञानजनकानिभवंति अत्रश्रुतितःकृता
त्मश्रवणस्यमननेऽधिकारः मननंचात्मनइतरभिन्नत्वेनानुमानं तच्चभेदप्रतियोगीतरज्ञानसाध्यं तथाचेतरेणवकेन
दर्थंपदार्थनिरूपणंसंक्षेपतः सामान्यतःपदार्थोद्विविधः भावोऽभावश्च भावःषड्विधः द्रव्यगुणकर्मसामान्यविशेषस
मवायभेदात् तत्रद्रव्यत्वगुणत्वकर्मत्वानिजातयः सामान्यत्वादीनिउपाधयः द्रव्याणिनव पृथिव्यप्तेजोवाय्वाकाश
कालदिगात्ममनांसि आकाशत्वकालत्वदिक्त्वान्युपाधयः अन्यानिजातयः तत्ररूपरसगंधस्पर्शसंख्यापरिमाणपृ
थक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्काराश्चतुर्दशगुणाः पृथिव्यां तत्रैवगंधंविहायस्नेहंविनियोज्यचतुर्द
शगुणाजलस्य रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्काराएकादशगुणास्तेजसः स्पर्श
संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारानवगुणावायोः शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभा

गाः षड्गुणा आकाशस्य संख्यापरिमाणपृथक्त्वसंयोगविभागाः पंचगुणाः कालदिशोः संख्यापरिमाणपृथक्त्वसं
योगविभागपरत्वापरत्वसंस्काराअष्टौगुणामनसः ज्ञानेच्छाकृतिसंख्यादिपंचकमष्टौगुणाईश्वरस्य तथान्च वायो
र्नवैकादशतेजसोगुणाजलक्षितिप्राणभृतांचतुर्दश दिक्कालयोःपंचषडेवचांबरेमहेश्वरेष्टौमनसस्तथैव १ तत्र
पृथिवीजलतेजोवायवोद्विविधाः परमाणवः सावयवाश्च आकाशकालात्मदिशोविभुरूपाः मनःपरमाणुरूपं त
त्रसावयवाअनित्याइतराणिनित्यानि सावयवोपित्रिविधः शरीरेंद्रियविषयभेदात् मानुषाणांशरीरंपार्थिवं
जलीयंशरीरंवरुणलोकेप्रसिद्धं तैजसंशरीरमादित्यलोके वायवीयंशरीरंवायुलोके घ्राणेंद्रियंपार्थिवं रसनेंद्रि
यंजलीयं चक्षुरिंद्रियंतैजसं त्वगिंद्रियंवायवीयं श्रोत्रेंद्रियंकर्णशष्कुल्यवच्छिन्नोनभप्रदेशः एतानिपंचबहिरिं
द्रियाणि मनोंतरिंद्रियं तेनषडिंद्रियाणि विषयाश्चशय्यादिरूपेणप्रसिद्धाः आत्माद्विविधः जीवात्मापरमात्मान्च
तत्रजीवात्मानःप्रतिशरीरंभिन्नाः बंधमोक्षयोग्याः परमात्माईश्वरः अथाप्रत्यक्षप्रत्यक्षद्रव्याणि परमाणुद्व्यणु
केऽप्रत्यक्षे उद्भूतरूपवत्त्वंयत्रतानिपृथिवीजलतेजांसिप्रत्यक्षाणि आत्माचप्रत्यक्षः वाय्वाकाशकालदिङ्मनांसि
त्वप्रत्यक्षाणि बहिर्द्रव्यप्रत्यक्षंप्रतिमहत्वेसतिउद्भूतरूपवत्वंप्रयोजकं अथद्रव्योत्पत्तिप्रक्रिया तत्रोत्पत्तिःकार

णवतां अनन्यथासिद्धकार्यनियतपूर्ववृत्तित्वंकारणत्वं त्रिविधानिकारणानि समवायिकारणासमवायिकारणनि
मित्तकारणानि यत्समवेतंकार्यमुत्पद्यतेतत्समवायिकारणं यथापरमाणुर्द्व्यणुकस्य समवायिकारणेसंबद्धंका
रणमसमवायिकारणं यथापरमाणुद्वयसंयोगोद्व्यणुकस्य कपालरूपंघटरूपस्य एतदुभयभिन्नकारणंनिमि
त्तकारणं यथाद्व्यणुकेईश्वरः घटेदंडः एतत्कारणत्रयंभावकार्यमात्रस्य तत्रसमवायिकारणंसर्वत्रद्रव्यमेव
असमवायिकारणंद्रव्येगुणः गुणेगुणः कर्मच्च कार्यमात्रंप्रतिसाधारणकारणानि ईश्वरेतज्ज्ञानेच्छाकृतयः
प्रागभावकालदिगदृष्टानि तत्रपरमाणुद्वयसंयोगात् द्व्यणुकमुत्पद्यते संयुक्तद्व्यणुकत्रयात्त्रसरेणुः एवंचतु
रणुकादिकपालांतं कपालद्वयसंयोगेनघटोजायते घटस्त्वंत्यावयवि अथद्रव्यप्रमाणंकथ्यते प्रत्यक्षद्रव्येप्र
त्यक्षमेवप्रमाणं अतींद्रियेअनुमानं तत्पक्षहेतुसाध्यदृष्टांतज्ञानसाध्यं विशेषोवक्ष्यते परमाणुद्व्यणुकानुमा
नंयथा त्रसरेणुःसावयवद्रव्यारब्धः बहिरिंद्रियवेद्य[illegible]त्वात् बहिरिंद्रियवेद्यद्रव्यंयत्तत्सावयवद्रव्यारब्धं
यथाघटः अत्रत्रसरेणुःपक्षः सावयवद्रव्यारब्धत्वंसाध्यं बहिरिंद्रियवेद्यद्रव्यत्वादितिहेतुः घटोदृष्टांतः अने
नद्व्यणुकंपरमाणुश्चसिध्यति आकाशवायुशब्देनस्पर्शेनचानुमीयेते शब्दोद्रव्याश्रितोगुणत्वात् यथाघटः

रूपं अनेनद्रव्यांतरबाधात्शब्दाश्रयत्वेनाकाशः सिध्यति पृथिव्यादिचतुष्टयावृत्तिरयंस्पर्शोद्रव्याश्रितोगुणत्वादि
त्यनुमानेनद्रव्यांतरबाधात्स्पर्शाश्रयत्वेनवायुः सिध्यति कालेप्रमाणंयथा परत्वापरत्वेद्विविधे कालिकेदैशि
केचेति परत्वोत्पत्तिश्चबहुतरविक्रियाविशिष्टशरीरज्ञानात् अपरत्वोत्पत्तिश्चस्वल्पतररविक्रियाविशिष्टशरी
रज्ञानात् तत्परत्वंज्येष्ठत्वं अपरत्वंकनिष्ठत्वं तदनुमानंयथा परत्वजनकबहुतररविक्रियाविशिष्टशरीरज्ञानमि
दंपरंपरासंबंधघटकसापेक्षं साक्षात्संबंधाभावेसतिविशिष्टज्ञानत्वात् लोहितःस्फटिकइतिप्रत्ययवत् परंपरासं
बंधश्चरविक्रियायाः स्वसमवायिसंयुक्तसंयोगः तेनसंबंधघटकतयाकालः सिध्यति ननुकालस्यभूतभविष्यद्व
र्तमानभेदेनबहुत्वात्कुतएकत्वमितिचेन्न उपाधिभेदेनभेदप्रत्ययात् कालोपाधयोरविक्रियादिरूपाभिन्नाए
व दैशिकपरत्वापरत्वाभ्यांदिशः सिद्धिः तेचदूरत्वसमीपत्वे अवधिसापेक्षबहुतरसंयोगविशिष्टशरीरज्ञानमि
दंपरत्वजनकंपरंपरासंबंधघटकसापेक्षमित्यादिपूर्ववत् तेनचदिशः सिद्धिः नचाकाशमेवसंबंधघटकमस्त्व
मितिवाच्यं तस्यशब्दाश्रयत्वेनैवधर्मिग्राहकप्रमाणसिद्धत्वात्नरविक्रियाद्युपनायकत्वसंभवः अहंसुखी
त्यादिप्रत्यक्षमात्मनिप्रमाणं ईश्वरेचानुमानं यथाक्षितिः सकर्तृकाकार्यत्वात् घटवत् तेनईश्वरस्यनि॰

त्यज्ञानेछाकृतीनांतत्सर्वज्ञत्वस्यचसिद्धिः मनसिप्रमाणं तद्यथा सुखादिप्रत्यक्षमिंद्रियजन्यंजन्यप्रत्यक्षत्वात्
घटप्रत्यक्षवत् तथाचेंद्रियांतरबाधेमनसः सिद्धिः अथद्रव्यनाशप्रक्रिया द्रव्यनाशोद्विविधः क्वचिदसमवा
यिकारणनाशात्क्वचित्समवायिकारणनाशाच्च तत्राद्योयथा परमाणुद्वयसंयोगनाशाद्व्यणुकनाशः द्विती
योयथा कपालनाशाद्घटनाशः घटनाशउभयतःसंभवति आकाशकालदिगात्मपरमाणवोऽवृत्तयः समवा
यश्च पृथिव्यादिपंचानांभूतत्वं पृथिवीजलतेजोवायुमनसांक्रियावत्वमूर्तत्वे पृथिवीजलतेजोवायवोद्रव्यस
मवायिकारणानि कालस्यकालिकसंबंधेनसर्वाधिकरणत्वं दिशोदैशिकसंबंधेनसर्वाधिकरणत्वं अथगुणाः
कथ्यंते रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेछाद्वेषप्रयत्नगुरुत्व
द्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाश्चतुर्विंशतिगुणाः अत्ररूपत्वादीनिसर्वाण्येवजातयः रूपंपृथिव्यादित्रयवृ
त्ति तच्चशुक्लनीलरक्तपीतचित्रादिभेदेनबहुविधं पृथिवीवृत्ति स्वच्छंशुक्लरूपंजलवृत्ति शुक्लभास्वररूपंतेजोवृ
त्ति रसः पृथिवीजलवृत्तिः तत्रमधुरलवणकटुकषायतिक्ताम्लाः षड्विधारसाः पृथिव्यां जलेमधुरएवरसः गं
धोद्विविधः सुरभिरसुरभिश्च पृथिवीमात्रवृत्तिः स्पर्शश्चपृथिव्यादिचतुष्टयवृत्तिः सत्रिविधः अनुष्णाशी

तर्कामृतं ३ तः शीतोष्णः श्च अनुष्णाशीतस्पर्शो वायुपृथिव्योः जलेशीतः तेजस्युष्णः संख्यापरिमाणपृथक्त्वसंयोगविभा
गानवद्रव्यवृत्तयः परत्वापरत्वे पृथिवीजलतेजोवायुमनोवृत्तीनि बुद्धिसुखदुःखेच्छाद्वेषकृतिभावनाधर्माधर्मा
आत्मवृत्तयः गुरुत्वं पृथिवीजलवृत्ति द्रवत्वं पृथिवीजलतेजोवृत्ति तद्द्विविधं नैमित्तिकं सांसिद्धिकं च आद्यं पृथि
वीतेजसोः द्वितीयं जले स्नेहो जलमात्रवृत्तिः संस्कारः पृथिवीजलतेजोवाय्वात्ममनोवृत्तिः स च त्रिविधः वेगो
भावनास्थितस्थापकश्च तत्र वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः द्वितीय आत्मवृत्तिः तृतीयः पृथिव्यादिचतु
ष्टयवृत्तिः शब्दो द्विविधः वर्णात्मको ध्वन्यात्मकश्च आकाशमात्रवृत्तिः रूपरसगंधस्नेहसांसिद्धिकद्रवत्व
शब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाविशेषगुणाः तथा चोक्तं रूपं गंधो रसः स्पर्शः स्नेहः सांसि
द्धिको द्रवः बुद्ध्यादिभावनांताश्च शब्दो वैशेषिको गुणाः १ संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व हेशिव
गुरुत्वनैमित्तिकद्रवत्ववेगः स्थितस्थापकः सामान्यगुणाः अथानित्यगुणाः जलतेजोवायुपरमाणूनां विशेष
गुणाः परमाणुवृत्तिगुरुत्वं स्थितस्थापकश्च विभूनां परमाणूनां चैकत्वपरिमाणपृथक्त्वानि ईश्वरेच्छाज्ञानकृ ३
तयश्च नित्यगुणाः अथाप्रत्यक्षगुणाः गुरुत्वधर्माधर्मभावनास्थितस्थापकाः परमाणुद्व्यणुकवृत्तिगुणाः

अतींद्रियवृत्तिसामान्यगुणाः त्रसरेणुरूपं विहायान्ये गुणा अतींद्रियाः रूपरसगंधस्पर्शस्नेहप्रत्यक्षे महद्वृत्तित्वे
सति उद्भूतत्वं प्रयोजकं रससामान्यप्रत्यक्षे गुणे आश्रयप्रत्यक्षं बुद्धिप्रत्यक्षे स्ववृत्तित्वविशिष्टज्ञानत्वं सुखादि
प्रत्यक्षे स्ववृत्तिसुखत्वादिकमेव। अंत्याद्यशब्दौ विहाय शब्दः प्रत्यक्षः अथ गुणोत्पत्तिप्रक्रिया अवयववृत्तिवि
शेषगुणा अवयविनि स्वसमानजातीयगुणानारभंते पृथिवीविशेषगुणाः पाकजाः ते द्विविधाः पाकप्रयोज्याः पा
कजन्याश्च कारणगुणप्रक्रमजन्याः पाकप्रयोज्याः अग्निसंयोगजन्या द्वितीयाः श्यामघटस्याग्निसंयोगेन श्या
मरूपनाशानंतरं घटे रक्तरूपमुत्पद्यते इति नैयायिकमते अग्निसंयोगेन परमाणुपाके सति परमाणौ रक्तरूपमुत्प
द्यते पुनर्घटोत्पत्तौ सत्यां कारणगुणप्रक्रमेण घटे रक्तरूपमुत्पद्यते इति वैशेषिकमते कपालं नीलमेकमेकं च पी
तं यदि तदा घटे चित्ररूपमुत्पद्यते रसादावेवं सति अवयविनि रसो न जायते चित्ररसाद्यस्वीकारात् गुरुत्वस्थित
स्थापकयोश्च कारणगुणप्रक्रमजन्यता द्वित्वादयोऽपेक्षाबुद्धिजन्याः परिमाणं चतुर्विधं अणु महत् ह्रस्वं दीर्घं च
कारणगुणप्रक्रमजन्यं स्वावयववहुत्वजन्यं यथा त्रसरेणूनामवयवानां शिथिलसंयोगः प्रचयोऽपि तज्जनकः
यथा तूलपरिमाणं पृथक्त्वं कारणगुणप्रक्रमजन्यं ननु तत्र किं प्रमाणं घटात्पटः पृथगिति प्रत्यक्षं तस्यान्यो

न्याभावविषयकत्वादितिचेन्न अन्योन्याभावप्रतीतिरनुयोगिप्रतियोगिनोः समानविभक्तिकत्वनियमात् यथा
घटोनपटइत्यन्योन्याभावस्यापृथक्करूपत्वेघटात्पटोनेत्यपिप्रयोगापत्तेः नचैवंघटादन्यःपटइत्यत्रकथमन्योन्या
भावप्रतीतिरितिवाच्यं अन्यत्वस्यापिपृथक्करूपत्वात् संयोगस्त्रिविधः अन्यतरकर्मजः उभयकर्मजः संयो
गजश्च आद्योयथा मनःकर्मणाआत्ममनसोःसंयोगः द्वितीयोयथा मेषयोःकर्मणातयोःसंयोगः तृतीयो
यथा कारणाकारणसंयोगात्कार्याकार्यसंयोगः हस्ततरुसंयोगात्कायतरुसंयोगः विभागस्त्रिविधः अन्यत
रकर्मजः उभयकर्मजः विभागजश्च आद्योयथा मनःकर्मणाआत्ममनसोर्विभागः द्वितीयोयथा मेषयोःक
र्मणातयोर्विभागः विभागजविभागोद्विविधः कारणमात्रविभागजः कारणाकारणविभागजश्च आद्योयथा क
पालकर्मणाकपालद्वयविभागः ततःकपालद्वयसंयोगनाशः ततोघटनाशः ततःकपालस्याकाशादिदेशाद्विभा
गोविभागजः नचविभागःस्वोत्पत्त्यनंतरमेवविभागजविभागंजनयत्विति वाच्यं द्रव्यनाशसहकृतस्यैवतस्य
तज्जनकत्वात् द्रव्यस्यप्रतिबंधकत्वेनसतिद्रव्येतदसंभवात् नचकर्मैवैकदाकपालद्वयविभागमाकाशकपाल
विभागंचजनयत्विति वाच्यं यद्द्रव्यानारंभकसंयोगविरोधिनंविभागमारभतेनतद्द्रव्यारंभकसंयोगविरोधि

अन्यथाकुड्मलभंगापत्तेः

नं यथाविकसत्कुड्मलदलकर्मेतिव्याप्तेः नचसंयोगेप्येवमस्तुतत्राविरोधात् द्वितीयस्तुकारणाकारणविभागात्का
र्याकार्यविभागः यथा हस्ततरुविभागात्कायतरुविभागः परत्वापरत्वोत्पत्तिःकालप्रकरणेउक्ता बुद्धिर्ज्ञानं तद्द्विविधं
स्मरणमनुभवश्च स्मरणंद्विविधं यथार्थमयथार्थंच तद्वतितत्प्रकारकत्वंयथार्थत्वं तदभाववतितत्प्रकारकत्वमय
थार्थत्वं पूर्वानुभवःसंस्कारद्वारास्मरणंजनयति तत्रपूर्वानुभवस्ययथार्थत्वायथार्थत्वाभ्यांस्मरणमुभयरूपंभव
ति अनुभवोद्विविधः प्रमाअयथार्थश्च तत्रप्रमाचतुर्विधा सावक्ष्यते अयथार्थज्ञानंचतुर्विधं संशयोविपर्ययः
स्वप्नोऽनध्यवसायश्च संशयोयथा समानधर्मवद्धर्मिज्ञानविशेषादर्शनकोटिस्मरणैः अयंस्थाणुर्वापुरुषोवेति
ज्ञानंजन्यतेसएवसंशयः विपर्ययस्तु समानधर्मवद्धर्मिज्ञानविशेषादर्शनैककोटिस्मरणैः शुक्ताविदंरजतमिति
ज्ञानंजन्यते तत्रगुरुमतेइदमित्यनुभवात्मकंज्ञानंरजतमितिस्मरणात्मकंज्ञानद्वयं नतुरजतत्वविशिष्टज्ञानमिति
अन्यस्यान्यथाभानसामग्र्यभावात् प्रवृत्तिश्चस्वतंत्रोपस्थितयोर्भेदाग्रहात् नैयायिकमतेप्रवर्तकंविशिष्टज्ञानंते
नभ्रमःसिध्यति स्वप्नस्तु अनुभूतपदार्थस्मरणैरदृष्टेनधातुदोषेणचजन्यते अनध्यवसायश्चकिंस्विदिदमिति
ज्ञानंविशेषादर्शनाद्भवति अत्रयद्ययंनिर्वह्निःस्यात्तदानिर्धूमोपिस्यादितितर्कोविपर्ययमध्येबोध्यः तत्रनैयायि

कमतेस्वप्नानध्यवसायोविपर्ययमध्येप्रविष्टो तेनतन्मतेअयथार्थज्ञानंद्विविधं संशयोविपर्ययश्चेति सुखंधर्मजन्यं
दुःखमधर्मजन्यं इछाइष्टसाधनताज्ञानजन्या द्वेषोऽनिष्टसाधनताज्ञानजन्यः कृतिस्त्रिविधा जीवनयोनियत्नरूपा
प्रवृत्तिर्निवृत्तिश्च आद्याजीवनादृष्टजन्या द्वितीयाइछाजन्या तृतीयाद्वेषजन्या धर्मः श्रुतिविहितकर्मजन्यः अधर्मः
श्रुतिविरुद्धाचरणजन्यः वेगाख्यःसंस्कारः आद्यक्रियाजन्यःद्वितीयादिक्रियाजनकः यथावेगेनबाणश्चलती
ति भावनाख्यःसंस्कारोविशिष्टज्ञानजन्यः स्थितस्थापकाख्यःकारणगुणप्रक्रमजन्यः गुरुत्वंकारणगुणप्रक्रमज
न्यं नैमित्तिकंद्रवत्वंजतुघृतसुवर्णादीनामग्निसंयोगजन्यं स्नेहःकारणगुणप्रक्रमजन्यः शब्दस्त्रिविधः संयोग
जोविभागजशब्दजश्च आद्योभेरीदंडसंयोगजन्यः द्वितीयोवंशादिदलद्वयविभागजन्यः तृतीयस्तुसंयोगेनवि
भागेनवाआद्यशब्देजनितेतेनशब्देननिमित्तवायुसहकृतेनवीचीतरंगन्यायेनकदंबगोलकन्यायेनवाजन्यते
उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानिपंचकर्माणि उत्क्षेपणत्वादीनिजातयः पृथिवीजलतेजोवायुमनो
वृत्तीनिकर्माणिसर्वाण्यनित्यानि अतींद्रियवृत्तीन्यतींद्रियाणि प्रत्यक्षवृत्तीनिप्रत्यक्षाणि अथकर्मप्रक्रिया
संयोगेननोदनाख्येनाद्यंकर्मजन्यते द्वितीयादिवेगजन्यं क्रियाक्रियातोविभागः विभागात्पूर्वदेशसंयोगनाशः

ततउत्तरदेशसंयोगः ततःकर्मविभागयोर्नाशः सामान्यंत्रिविधं व्यापकंव्याप्यंव्याप्यव्यापकंच व्यापकंसत्ता व्या
प्यंघटत्वादि द्रव्यत्वादिव्याप्यव्यापकंच व्यक्तेरभेदस्तुल्यत्वंसंकरोथानवस्थितिः रूपहानिरसंबंधोजातिबाधक
संग्रहः नित्यत्वेसत्यनेकसमवेतत्वमितिसामान्यलक्षणं सामान्यानिनित्यान्येव अतींद्रियवृत्तीन्यतींद्रिया
णि प्रत्यक्षवृत्तीनिप्रत्यक्षाणि नित्यद्रव्यवृत्तयोंऽत्याविशेषाः तेचबहवोनित्याःअतींद्रियाश्च प्रलयेपरमाणू
नांभेदायतेस्वीक्रियंते तेषांवैधर्म्यव्याप्यत्वादिति संबंधिभिन्नोनित्यःसंबंधःसमवायः तेनस्वरूपसंबंधस्य
संयोगस्यचनिरासः इहघटेघटत्वमितिप्रतीतिस्तत्रप्रमाणं नैयायिकमतेसमवायःप्रत्यक्षोनित्यश्च नन्वन्या
न्यान्यप्यंधकारसुवर्णादीनिद्रव्याणिसंति आलस्यादयोगुणाअपिसंतिकथंनवैवेत्यादि मैवं अंधकारोनद्रव्यं
किंतुतेजोभावः सुवर्णंतेजएव आलस्यंकृत्यभावः एवमन्यदपि अभावोद्विविधः संसर्गाभावोन्योन्याभावश्च
आद्यस्त्रिविधः प्रागभावोध्वंसअत्यंताभावश्च प्रागभावोविनाशीअजन्यः ध्वंसोजन्योऽविनाशी अत्यंता
न्योन्याभावावजन्यौअविनाशिनौ योग्यानुपलब्ध्याअभावप्रत्यक्षः अन्यत्रत्वतींद्रियः अथप्रमाकथ्यंते
साप्रमाचतुर्विधा प्रत्यक्षानुमित्युपमितिशाब्दरूपा तत्करणानिप्रमाकरणानिचत्वारि प्रत्यक्षानुमानोपमा

नशब्दभेदात् तत्रप्रत्यक्षंद्विविधं निर्विकल्पकंसविकल्पकंच प्रत्यक्षकरणानिषडिंद्रियाणि घ्राणरसनचक्षुस्त्वक्
श्रोत्रमनांसि एतानिसन्निकर्षसहितानिप्रत्यक्षंजनयंति सन्निकर्षश्चलौकिकोलौकिकश्च अलौकिकस्त्रिवि
धः ज्ञानलक्षणासामान्यलक्षणायोगजधर्मश्च लौकिकःषड्विधः संयोगःसंयुक्तसमवायःसंयुक्तसमवेतस
मवायःसमवायःसमवेतसमवायोविशेषणताचेति संयोगेनद्रव्यग्रहः संयुक्तसमवायेनशब्दान्यगुणकर्म
द्रव्यवृत्तिजातीनांप्रत्यक्षं संयुक्तसमवेतसमवायेनशब्दमात्रवृत्तिजातीतरगुणवृत्तिजातिकर्मवृत्तिजातीनां
प्रत्यक्षं समवायेनशब्दस्य समवेतसमवायेनशब्दवृत्तिजातेः विशेषणतयाअभावस्यसमवायस्यच अ
लौकिकःसयथा ज्ञानलक्षणयासुरभिचंदनमितिचाक्षुषज्ञानं सामान्यलक्षणयाघटत्वेनरूपेणयावद्घटः
ज्ञानं योगजधर्मेणयोगिनांसर्वज्ञानं तत्रनिर्विकल्पकंविशेष्यताप्रकारतादिरहितंवस्तुस्वरूपमात्रज्ञानं
सविकल्पकंसप्रकारकं भासमानवैशिष्ट्यप्रतियोगिकत्वंचप्रकारत्वं यथाऽयंघटइत्यत्रायंविशेष्यःघटत्व
प्रकारकः भासमानवैशिष्ट्यंएतयोःसमवायः तस्यप्रतियोगिघटत्वंसविकल्पकमेवविशिष्टवैशिष्ट्यज्ञानं य
थादंडीइत्यत्रदंडत्वविशिष्टस्यवैशिष्ट्यंपुरुषेभासते अथज्ञानप्रक्रिया आदाविंद्रियसन्निकर्षात्घटघटत्वे

इतिनिर्विकल्पकं ततोऽयंघटइतिविशिष्टज्ञानं तत्रपरतःप्रामाण्यग्रहइतिनैयायिकाः यथा आदौअयंघटइतिव्यव
सायःततोघटमहंजानामीत्यनुव्यवसायः ततःप्रामाण्याप्रामाण्येइतिकोटिद्वयस्मरणं अथचतुर्थेइदंज्ञानंप्रमान
वेतिप्रामाण्यसंशयः ततोविशेषदर्शनानंतरंप्रामाण्यग्रहः इदंज्ञानंप्रमा समर्थप्रवृत्तिजनकत्वात् ज्ञानांतरवत्
स्वतःप्रामाण्यग्रहइतित्रयोमीमांसकाः तत्रगुरुमतेअयंघटइतिज्ञानंविषयंआत्मानंज्ञानप्रामाण्यंचगृह्णा
ति मुरारिमिश्रमतेअयंघटइतिज्ञानानंतरंघटमहंजानामीत्यनुव्यवसायस्तेनैवप्रामाण्यग्रहः भट्टमतेज्ञान
स्यातींद्रियत्वेनज्ञानमनुमेयंयथातथाभवत्येवप्रामाण्यं यथाऽयंघटइतिज्ञानानंतरंघटेज्ञातताउत्पद्यते त
तोज्ञातोमयाघटइतिज्ञाततात्प्रत्यक्षं ततोव्याप्त्यादिप्रत्यक्षानंतरंज्ञानानुमानं यथाअहंघटत्वप्रकारकज्ञानवा
न् घटत्वप्रकारकज्ञाततावत्वात् तस्यधर्मधर्मिविषयकत्वेनप्रामाण्यानुमानं इतिप्रत्यक्षपरिच्छेदः अनुमि
तिकरणमनुमानं अनुमितित्वंजातिः व्यापारवत्कारणंकरणं व्यापारश्चतज्जन्यत्वेसतितज्जन्यजनकः हेतु
ज्ञानादिकरणं परामर्शोव्यापारः परामर्शश्चव्याप्तिविशिष्टपक्षधर्मताज्ञानं यथावह्निव्याप्यधूमवानयमिति
आदौमहानसादौधूमवह्निसामानाधिकरण्यग्रहेसतिधूमोवह्निव्याप्यइत्यनुभवोजन्यते ततःकालांतरेपर्वतेधू

मेदृष्टेसतिव्याप्तिस्मरणं ततश्चविशिष्टवैशिष्ट्यज्ञानं वह्निव्याप्यधूमवानयमिति तृतीयलिंगपरामर्शः पक्षतासहितेनतेन
नपर्वतोवह्निमानित्यनुमितिर्जन्यते व्याप्तिश्चहेतुसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यमित्य
र्थात् पक्षताचसिसाधयिषाविरहसहकृतसिध्यभावः अनुमानंद्विविधं स्वार्थंपरार्थंच तत्परार्थंचपंचावयवसाः
ध्यं अवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पर्वतोवह्निमान् धूमात् यत्रयत्रधूमस्तत्रतत्रवह्निः यथा
महानसं वह्निव्याप्यधूमवानयं तस्माद्वह्निमान् स्वार्थंचस्वीयव्याप्त्यादिज्ञानसाध्यं नतत्रप्रतिपत्त्यर्थमेवाहत्य
शब्दप्रयोगः तच्चानुमानंत्रिविधं केवलान्वयिकेवलव्यतिरेकिअन्वयव्यतिरेकिभेदात् यत्रसाध्यव्यतिरेकोनकुत्रा
प्यस्तिसकेवलान्वयी यथाघटोऽभिधेयःप्रमेयत्वातइत्यत्र अभिधेयत्वस्यसाध्यस्यव्यतिरेकाप्रसिद्धः यत्रसा
ध्यप्रसिद्धिःपक्षातिरेकेनास्तिसकेवलव्यतिरेकी यथापृथिवीइतरेभ्योभिद्यते पृथिवीत्वात् यत्रइतरभेदाभावस्तत्र
पृथिवीत्वाभावः यथाजलादि व्यतिरेकव्याप्तौतुसाध्याभावोव्याप्यःहेत्वभावोव्यापकः सोन्वयव्यतिरेकी यत्रसा
ध्यंसाध्याभावश्चान्यत्रप्रसिद्धः यथापर्वतोवह्निमान्धूमादिति अन्वयव्यतिरेकिणिहेतावव श्यंपंचरूपोपपन्न
ताऽपेक्षणीया पक्षसत्वंसपक्षसत्वंविपक्षव्यावृत्तत्वंअबाधितत्वंअसत्प्रतिपक्षत्वंचेतिपंचरूपाणि केवलान्वयि

विपक्षव्यावृत्तत्वरहिततत्वंकेवलव्यतिरेकिणिसपक्षसत्वरहितंचतूरूपमेवापेक्षितं यत्रसाध्यसंदेहःसपक्षः यत्र
साध्यनिश्चयःससपक्षः यत्रसाध्याभावनिश्चयःसविपक्षः साध्याभाववान्पक्षोबाधः साध्यविरोधिसाधक
हेतुःसत्प्रतिपक्षः सोपाधोपक्षसत्वाद्यन्यतमभंगआवश्यकः सोपाधिश्चसव्यभिचारितासंबंधेनोपाधिविशिष्टः
उपाधिश्चत्रिविधः साधनाव्यापकत्वेसतिशुद्धसाध्यव्यापकः साधनाव्यापकत्वेसतिपक्षधर्मावछिन्नसाध्य
व्यापकः साधनाव्यापकत्वेसतिसाधनावछिन्नसाध्यव्यापकश्च आद्योयथा अयोगोलकंधूमवद्वह्नेः अत्रा
र्द्रेंधनप्रभववह्निमत्वमुपाधिः द्वितीयोयथा वायुःप्रत्यक्षःप्रत्यक्षस्पर्शाश्रयत्वात् अत्रबहिर्द्रव्यप्रत्यक्षत्वावछि
न्नप्रत्यक्षत्वस्यसाध्यस्यव्यापकसद्भूतरूपवत्वमुपाधिः तृतीयोयथा ध्वंसोविनाशीजन्यत्वात् अत्रजन्यत्वाव
छिन्नविनाशित्वव्यापकंभावत्वमुपाधिः अथहेत्वाभासाःकथ्यंते सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः
पंचहेत्वाभासाः सव्यभिचारस्त्रिविधः साधारणासाधारणानुपसंहारिभेदात् साध्यात्यंताभाववद्वृत्तित्वंसाधा
रणत्वं यथाधूमवद्वह्नेः सकलसपक्षव्यावृत्तत्वमसाधारणत्वं पर्वतोवह्निमान् पर्वतत्वात् सर्वपक्षकत्वमनुपसं
हारित्वं यथासर्वंप्रमेयमभिधेयत्वात् साध्याभावव्याप्तोहेतुर्विरुद्धः यथाघटोनित्यः सावयवत्वात् सत्प्रति

तर्कामृतं पक्षोयथा पर्वतोवह्निमान् धूमात् पर्वतोवह्न्यभाववान् महानसान्यत्वात् असिद्धस्त्रिविधः आश्रयासिद्धःस्व
८ रूपासिद्धोव्याप्यत्वासिद्धश्च यत्रपक्षो ऽसन् सिद्धसाधनंवासआश्रयासिद्धः यथाशशविषाणंनित्यं अजन्य
त्वात् शरीरंहस्तादिमत् हस्तादिमत्तयाप्रतीयमानत्वात् यत्रपक्षावृत्तिर्हेतुःसस्वरूपासिद्धः यथापर्वतो
वह्निमान् महानसत्वात् सचविशेषणासिद्धविशेष्यासिद्धभागासिद्धभेदात्त्रिविधः आद्योयथा शब्दोऽ
नित्यः चाक्षुषत्वेसतिजन्यत्वात् द्वितीयोयथा शब्दोनित्यःगुणत्वेसतिपरमाणुवृत्तित्वात् तृतीयोयथा
एतानिनवद्रव्याणिनिरवयवत्वात् बाधोयथा जलह्रदोवह्निमान् द्रव्यत्वादिति तेनएतद्दोषरहितोहेतुः
सद्धेतुः उपमितिकरणमुपमानं कीदृशोगवयइतिप्रश्नेगोसदृशोगवयइतिउत्तरितेयदागोसदृशंप्राणि हेशिव
नंपश्यतितदापूर्वोक्तवाक्यस्मरणानंतरंसयंगवयपदवाच्यइतियःशक्तिग्रहःसोपमितिः आप्तोक्तःशब्दः
प्रमाणं प्रकृतवाक्यार्थगोचरयथार्थज्ञानवानाप्तः पदज्ञानंकरणं पदजन्यपदार्थोपस्थितिर्व्यापारः आकां ८
क्षायोग्यताऽसत्तितात्पर्यज्ञानानिसहकारीणि फलंशाब्दबोधः स्वरूपयोग्यत्वेसति अजनितान्वयबो
धकत्वमाकांक्षा तेनघटःकर्मत्वमानयनंकृतिरित्यत्रनान्वयबोधः स्वरूपायोग्यत्वात् अयमेतिपुत्रोरा

ज्ञःपुरुषोपसार्यतामित्यत्रराज्ञःपुरुषइतिनान्वयबोधः पुत्रेणजनितान्वयबोधात् बाधकप्रमाविरहोयोग्यता।
तेनवह्निनासिंचतीत्यत्रनान्वयबोधः अयोग्यत्वात् अव्यवधानेनान्वयप्रतियोग्युपस्थितिरासत्तिः तेनगिरिर्भु
क्तंवह्निमान्देवदत्तेनेत्यादौनान्वयबोधः तत्तदर्थप्रतीतीच्छयोच्चरितत्वंतात्पर्यं तेनभोजनप्रकरणेसैंधवमानयेत्युक्तेऽ
श्वान्वयबोधोनभवति वृत्तिंविनाशब्देननान्वयबोधोजन्यते वृत्तिर्द्विधा शक्तिर्लक्षणाच शक्तिर्घटादिपदस्यघ
टादौ लक्षणायथा गंगायांघोषःप्रतिवसतीत्यत्रगंगापदार्थप्रवाहेघोषवासान्वयानुपपत्त्यागंगापदस्यतीरेल
क्षणाकल्प्यते तयावृत्त्याउपस्थितेतीरेघोषःप्रतिवसतीत्यन्वयबोधोभवति गौणीवृत्तिरपिलक्षणैव यथाग्निर्मा
णवकोगौर्वाहीकः अत्रलक्षणयाऽग्न्यादिसादृश्यंप्रतीयते शक्तंपदंचतुर्विधं योगिकंरूढंयोगरूढंयोगिक
रूढंच आद्यंयथा पाचकादिपदंयोगार्थेनपाककर्तरिशक्तं द्वितीयंयथा विप्रादिपदंब्राह्मणवाचकं तृती
यंयथा पंकजादिपदंयोगरूढ्यापंकजनिकर्तृत्वेनपद्मत्वेनचपद्मवाचकं चतुर्थंयथा उद्भिदपदंयोगिकंरव
नित्राादिवाचकं रूढ्याअंकुरवाचकं लक्षणाद्विविधा जहत्स्वार्थाऽजहत्स्वार्थाच आद्यायथा गंगायांघो
षइत्यादौ द्वितीयायथा सर्वेछत्रिणोयांतीत्यादौछत्रिणस्तदितरस्यापिगमनान्वयः अथशाब्दबोधम

क्रिया देवदत्तोग्रामंगच्छतीत्यत्रग्रामकर्मकगमनजनकवर्तमानकृतिमानित्यन्वयबोधः द्वितीयाया अर्थः क
र्मत्वं धातोर्गमनंजनकत्वंसंसर्गमर्यादयालभ्यं लटोवर्तमानत्वं आख्यातस्यकृतिः तत्संबन्धः संसर्गमर्यादा
लभ्यः यत्रकर्तरिकृतेर्बाधस्तत्राख्यातस्यव्यापारादौलक्षणा यथारथोगच्छतीत्यत्रगमनजनकवर्तमान
व्यापारवानर्थः दधिपश्यतीत्यादौद्वितीयालोपस्थलेदधिशब्दएवाजहत्स्वार्थलक्षणयादधिकर्मत्वंचोपस्था
पयति एकवचनाद्युपस्थितमेकवत्वादि सर्वत्रप्रथमादिपदसुपस्थापयति देवदत्तेनगम्यतेग्रामइत्यस्यदेव
दत्तवृत्तिकृतिजन्यगमनजन्यफलशालीग्रामइत्यर्थः वृत्तित्वंसंसर्गमर्यादालभ्यं तृतीयायाश्चकृतिः जन्यत्वं
संसर्गः गमनंधात्वर्थः जन्यत्वंसंसर्गः फलंकर्मात्मनेपदार्थः शालित्वंसंसर्गः भावप्रत्ययेतुदेवदत्तेनस्व
प्यतइत्यस्यदेवदत्तवृत्तिकृतिजन्यःस्वापइत्यर्थः भावप्रत्ययस्थलेफलाभावादात्मनेपदार्थोनभासते भविष्य
त्वंलृटोर्थः तच्चविद्यमानप्रागभावप्रतियोग्युत्पत्तिकत्वं तेनागमिष्यतीत्यत्रविद्यमानप्रागभावप्रतियोग्यु
त्पत्तिकागमनानुकूलकृतिमानित्यर्थः लुटोर्थः अनद्यतनत्वमपि लुङोर्थः उत्पत्तिर्भूतत्वंच भूतत्वमतीतत्वं
तच्चोत्पन्नावन्वेति तथाचविद्यमानध्वंसप्रतियोग्युत्पत्तिकत्वंलब्धं लिटोपिपरोक्षत्वमतीतत्वंचार्थः तदन्वयः

पूर्ववदुत्पत्तौ लङोऽनद्यतनत्वमतीतत्वंचार्थः विधिलिङोर्थः कृतिसाध्यत्वेसतिबलवदनिष्टाजनकेष्टसाधनत्वं स्वः
र्गकामोयजेतेत्यादौकृतिसाध्यबलवदनिष्टाजनकेष्टसाधनयागकःस्वर्गकामइत्यर्थः आशीर्लिङ् लोटोरर्थः वक्त्रि
च्छाविषयत्वं तेनघटमानयेत्यत्रघटकर्मकमदिच्छाविषयानयनानुकूलकृतिमांस्त्वमित्यन्वयः व्याप्यक्रियया व्या
पकक्रियाया आपादानंलृङोर्थः तात्पर्यवशात्क्वचिद्भूतत्वंक्वचिद्भविष्यत्वंलृङा बोध्यते सनः कर्तुरिच्छार्थः सन्न
न्तराख्यातस्याश्रयत्वेलक्षणा सविषयकार्थप्रकृतिकाख्यातस्यलक्षणायोआश्रयत्वंघटंजानातीत्यादौकृ
त्तत्वात् यङोर्थः पौनःपुन्यंतत्वंचतदानींतनप्रकृत्यर्थसजातीयक्रियांतरध्वंसकालीनत्वेसतिवर्तमानादिकृ
तिविषयत्वं पापच्यतइत्यादौतादृशकालीनत्वमेवयङाप्रत्याय्यते आख्यातस्यचरमदलवाचकत्वान्नविशि
ष्टवाचकत्वंयङः तदानींतनत्वंचस्थूलकालमादायपूर्वकालीनत्वंकर्तृचक्त्वार्थः पूर्वत्वंचसन्निहितक्रियापे
क्षयाबोध्यं तत्पूर्वकालीनत्वंतत्प्रागभावकालवृत्तित्वंतदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वंवा तेनभुक्त्वा
व्रजतिइत्यत्रगमनेप्रागभावावच्छिन्नकालवृत्तिभोजनकर्त्रभिन्नोव्रजतीत्यर्थः समानविभक्तिकृतोऽभेदेनधर्मि
वाचकत्वात् अव्ययत्वेनक्त्वापरविभक्तिलोपात् कालस्तात्पर्यवशात्व्यवहिताव्यवहितसाधारणोबोध्यः तेन

तर्कामृतं १०

पूर्वस्मिन्नब्देगत्वाऽस्मिन्नब्देसमागतइत्यत्रतादृशप्रयोगावगमः इच्छावाननुसुनोर्थः भोक्तुंव्रजतीत्यस्यभोजनेच्छा
वान्व्रजतीत्यर्थः भोक्तुमिच्छतीत्यत्रकर्तरिलक्षणा भोजनकर्तारमात्मानमिच्छतीत्यर्थः सविशेषणेहीतिन्यायात्
विशेषणकृताविच्छान्वयः प्रकृतधात्वर्थकर्ताशतृशानचोः धात्वर्थजन्यफलवान्कर्मशानचोर्थः शत्रादीनांकर्ता
वाच्यः सविषयप्रकृतिकानामाश्रयेलक्षणा एवंकर्तृकर्मकृतांतेनरूपेणकर्ताकर्मचवाच्यं भावकृतांतुल्युट्
घञादीनांप्रयोगसाधुत्वमात्रं धात्वर्थातिरिक्तस्यभावकृतानुपस्थानादिति ननुनीलंघटमानयेत्यादौद्वितीया
द्वयश्रवणात्कर्मद्वयबोधापत्तिः नतुविशिष्टस्यकर्मत्वमितिचेन्न तत्रविशेषणाद्विभक्तिःसाधुत्वाय अथवा
विशेषणविभक्तेरभेदोर्थः अत्रायंविशेषः द्वितीयपक्षेवाक्यसमासयोःपर्यायत्वंनघटते वाक्येनीलंघटमित्यादौ
वभेदस्यपदार्थत्वेनप्रकारत्वान्नसंसर्गत्वं नीलंघटमित्यादौकर्मधारयेलक्षणायाअस्वीकारेणाभेदस्यापदार्थ हेशिव
त्वेसंसर्गत्वात् तथाचवाक्यसमासयोःपर्यायत्वानुरोधेनषष्ठीसमासेराजपुरुषइत्यादौषष्ठ्यर्थसंबंधेलक्षणा
नघटते संबंधस्यसंसर्गमर्यादालभ्यत्वात् वस्तुतस्तुविरुद्धविभक्त्यनवरुद्धस्याभेदबोधकत्वव्युत्पत्तेर्मुख्या १०
र्थराजाभेदस्यबाधेनराजपदस्यराजसंबंधिनिलक्षणा एवंबहुव्रीहौचरमपदस्यान्यपदार्थेलक्षणा तथाचद्व
द्वकर्मधारयान्यसमासेसर्वत्रतत्तदर्थेलक्षणा एवंनञोर्थाभावोघटंभूतलमित्यादौघटभिन्नेलक्षणा नक

लंजंभक्षयेदित्यादौबलवदनिष्टजनकेलक्षणा क्रियासंगतस्यैवकारस्यात्यंतायोगव्यवच्छेदोर्थः यथानीलंस
रोजंभवत्येव विशेषणसंगतस्यायोगव्यवच्छेदः यथाशंखःपांडुरएवेति विशेष्यसंगतस्यान्ययोगव्यवच्छेदः
पार्थएवधनुर्धरइत्यादौ एवंदिशासर्वंबोध्यमिति इतिश्रीजगदीशभट्टाचार्यविरचितंतर्कामृतंसमाप्ति
मगमत् श्रीमल्लक्ष्मीनारायणचरणसरोरुहार्पणमस्तु श्रीशके १७७८ अनलाब्दे चैत्रासिते
कादश्यांसौम्येइदंतर्कामृतमुपाध्योपाभिधश्रीनिवासोलिखत्स्वार्थंपरार्थंच श्रीमदार्यादुर्गार्पणमस्तु

येनेंद्रियेणयाव्यक्तिर्गृह्यतेतेनेंद्रियेणतद्गताजातिःतदभावश्चगृह्यते॥

670

इतितर्कामृतंसमाप्तंशुभंभवतु